श्री अष्टलक्ष्मी स्तुति (श्री गणपति सच्चिदानंद विरचित)

रथमध्यामश्वपूर्वां गजनादप्रबोधिनीं ।
साम्राज्यदायिनीं देवीं गजलक्ष्मीं नमाम्यहं ॥1॥

धनमग्निर्धनं वायुः धनं भूतानि पंच च ।
प्रभूतैश्वर्यसंधात्रीं धनलक्ष्मीं नमाम्यहं ॥2॥

पृथ्वीगर्भसमुद्भिन्ननानाव्रीहिस्वरुपिणीं ।
पशुसंपत्स्वरूपां च धान्यलक्ष्मीं नमाम्यहं ॥3॥

न मात्सर्यं न च क्रोधो न भीतिर्न च भेदधीः ।
यद्भक्तानां विनीतानां धैर्यलक्ष्मीं नमाम्यहं ॥4॥

पुत्रपौत्रस्वरूपेण पशुभृत्यात्मना स्वयं ।
संभवंती च संतानलक्ष्मीं देवीं नमाम्यहं ॥5॥

नानाविज्ञानसंधात्रीं बुद्धिशुद्धिप्रदायिनीं ।
अमृतत्वप्रदात्रीं च विद्यालक्ष्मीं नमाम्यहं ॥6॥

नित्यसौभाग्यसौशील्यं वरलक्ष्मीं ददाति या ।
प्रसन्नां स्त्रैणसुलभां आदिलक्ष्मीं नमाम्यहं ॥7॥

सर्वशक्ति स्वरूपां च सर्वसिद्धिप्रदायिनीं ।
सर्वेश्वरीं श्री विजयलक्ष्मीं देवीं नमाम्यहं ॥8॥

अष्टलक्ष्मींसमाहारस्वरुपां तां हरिप्रियां ।
मोक्षलक्ष्मीं महालक्ष्मीं सर्वलक्ष्मीं नमाम्यहं ॥9॥

दारिद्र्यदुःखहरणं समृद्धिमपि संपदां ।
सच्चिदानंदपूर्णत्वं अष्टलक्ष्मीस्तुतेर्भवेत् ॥10॥

इति श्रीदत्तपीठाधीश्वर श्री गणपति सच्चिदानंदयतिवर
विरचिता अष्टलक्ष्मीस्तुतिः समाप्ता ।